# Mahabalikritam Sudarshana Stotram

# મહાબલિકૃતં સુદર્શનસ્તોત્રમ્

## Document Information

Text title : Mahabalikritam Sudarshana Stotram

File name : sudarshanastotraMmahAbalikRRitam.itx

Category : vishhnu, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : from Vishnudharma Upapurana. Adhyaya 78

Latest update : December 25, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2021

*sanskritdocuments.org*

# મહાબલિકૃતં સુદર્શનસ્તોત્રમ્

બલિરુવાચ -
અનન્તસ્યાપ્રમેયસ્ય વિશ્વમૂર્તેર્મહાત્મનઃ ।
નમામિ ચક્રિણશ્ચક્રં કરસઙ્ગિ સુદર્શનમ્ ॥ ૫૦॥

સહસ્રમિવ સૂર્યાણાં સઙ્ઘાતં વિદ્યુતામિવ ।
કાલાગ્નિમિવ યચ્ચક્રં તદ્વિષ્ણોઃ પ્રણમામ્યહમ્ ॥ ૫૧॥

દુષ્ટરાહુગલચ્છેદશોણિતારુણતારકમ્ ।
તન્નમામિ હરેશ્ચક્રં શતનેમિ સુદર્શનમ્ ॥ ૫૨॥

યસ્યારકેષુ શક્રાદ્યા લોકપાલા વ્યવસ્થિતાઃ ।
તદન્તર્વસવો રુદ્રાસ્તથૈવ મરુતાં ગણાઃ ॥ ૫૩॥

ધારાયાં દ્વાદશાદિત્યાઃ સમસ્તાશ્ચ હુતાશનાઃ ।
ધારાજાલેઽબ્ધયઃ સર્વે નાભિમધ્યે પ્રજાપતિઃ ॥ ૫૪॥

સમસ્તનેમિષ્વખિલા યસ્ય વિદ્યાઃ પ્રતિષ્ઠિતાઃ ।
યસ્ય રૂપમનિર્દેશ્યમપિ યોગિભિરુત્તમૈઃ ॥ ૫૫॥

યદ્ભ્રમત્સુરસઙ્ઘાનાં તેજસઃ પરિબૃંહણં
દૈત્યૌજસાં ચ નાશાય તન્નમામિ સુદર્શનં
ભ્રમન્મતમહાવેગવિભ્રાન્તાખિલખેચરં
તન્નમામિ હરેશ્ચક્રમનન્તારં સુદર્શનં
નક્ષત્રવદ્વહ્નિકણવ્યાપ્તં કૃત્સ્નં નભસ્તલં
તન્નમામિ હરેશ્ચક્રં કરસઙ્ગિ સુદર્શનં
સ્વભાવતેજસા યુક્તં યદર્કાગ્નિમયં મહત્ ।
વિશેષતો હરેર્ગત્વા સર્વદેવમયં કરમ્ ॥ ૫૭॥

દુર્વૃત્તદૈત્યમથનં જગતઃ પરિપાલકમ્ ।
તન્નમામિ હરેશ્ચક્રં દૈત્યચક્રહરં પરમ્ ॥ ૫૮॥

કરોતુ મે સદા શર્મ ધર્મતાં ચ પ્રયાતુ મે ।
પ્રસાદસુમુખે કૃષ્ણે તસ્ય ચક્રં સુદર્શનમ્ ॥ ૫૯॥

સ્વભાવતેજસા યુક્તં મધ્યાહ્નાર્કસમપ્રભં
પ્રસીદ સંયુગેઽરીણાં સુદર્શનસુદર્શનમ્ ।
વિદ્યુજ્જ્વાલામહાકક્ષં દહાન્તર્મમ યત્તમઃ ॥ ૬૦॥

જહિ નો વિષયગ્રાહિ મનો ગ્રહવિચેષ્ટિતમ્ ।
વિસ્ફોટયાખિલાં માયાં કુરુષ્વ વિમલાં મતિમ્ ॥ ૬૧॥

એવં સંસ્તૂયમાનં તદ્વહ્નિપિણ્ડોપમં મહત્ ।
બભૂવ પ્રકટં ચક્રં દૈત્યચક્રપતેસ્તદા ॥ ૬૨॥

દદર્શ સ મહાબાહુઃ પ્રભામણ્ડલદુર્દૃશમ્ ।
અગ્નિજ્વાલાગતં તામ્રં તપ્તચક્રમિવાપરમ્ ॥ ૬૩॥

ભ્રમતસ્તસ્ય ચક્રસ્ય નાભિમધ્યે મહીપતે ।
ત્રૈલોક્યમખિલં દૈત્યો દૃષ્ટવાન્ભૂર્ભુવાદિકમ્ ॥ ૬૪॥

મેર્વાદીનખિલાઞ્છૈલાન્ગઙ્ગાદ્યાઃ સરિતસ્તથા ।
ક્ષીરાબ્ધિપ્રમુખાંશ્ચાબ્ધીન્દ્વીપાઞ્જમ્બ્વાદિસંજ્ઞિતાન્ ॥ ૬૫॥

વૈમાનિકાન્સગન્ધર્વાન્સૂર્યાદીંશ્ચ તથા ગ્રહાન્ ।
નક્ષત્રતારકાકાશં શક્રાદીંશ્ચ દિવૌકસઃ ॥ ૬૬॥

રુદ્રાદિત્યાંશ્ચ મરુતાં સાધ્યાનાં ચ મહીપતે ।
સન્નિધાનં નિરીક્ષ્યાસૌ દૈત્યાનાં વિસ્મિતોઽભવત્ ॥ ૬૭॥

તતઃ પ્રણમ્યાર્તિહરં સુરાણામપારસારં પરમાયુધં હરેઃ ।
નમો નમસ્તેઽસ્ત્વિતિ દૈત્યરાજઃ પ્રોવાચ ભૂયોઽપિ નમો નમસ્તે ॥ ૬૮॥

યન્નોઽશુભં ચેતસિ વાયુવેગ યન્નોઽશુભં વાચિ હુતાશનોત્થ ।
યચ્ચાશુભં કાયકૃતં હરેસ્તદ્વરાયુધં ત્વં પ્રશમં નયાશુ ॥ ૬૯॥

પ્રસીદ સત્કારકૃતં મમાદ્યં પ્રયાતુ તે નાશમનન્તવીર્ય ।
સતાં ચ સન્માર્ગવતાં મનાંસિ સ્થિરીભવન્ત્વચ્યુતપાદયુગ્મે ॥ ૭૦॥

ઇતિ વિષ્ણુધર્મેષુ અષ્ટસપ્તતિતમોઽધ્યાયાન્તર્ગતં મહાબલિકૃતં સુદર્શનસ્તોત્રમ્ ।

Proofread by PSA Easwaran

*Mahabalikritam Sudarshana Stotram*
pdf was typeset on December 25, 2021

Please send corrections to *sanskrit@cheerful.com*